# Chaitanyashtakam 3

# ચૈતન્યાષ્ટકમ્ ૩

## Document Information

Text title : chaitanyAShTakam 3

File name : chaitanyAShTakam3.itx

Category : deities_misc, gurudev, rUpagosvAmin, stavamAlA, aShTaka

Location : doc_deities_misc

Author : Rupagoswami

Transliterated by : Jan Brzezinski (Jagadananda Das) jankbrz at yahoo.com and Neal Delmonico (Nitai Das) ndelmonico at sbcglobal.net

Description/comments : From stavamAlA (rUpagosvAmivirachitA) Garland of Devotional Prayers stavamAlA

Acknowledge-Permission: http://granthamandira.net Gaudiya Grantha Mandira

Latest update : February 22, 2019

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 25, 2021

*sanskritdocuments.org*

Chaitanyashtakam 3

# ચૈતન્યાષ્ટકમ્ ૩

અથ શ્રીચૈતન્યદેવસ્ય તૃતીયાષ્ટકં

ઉપાસિતપદામ્બુજસ્ત્વમનુરક્તરુદ્રાદિભિઃ
 પ્રપદ્ય પુરુષોત્તમં પદમદભ્રમુદ્ભ્રાજિતઃ ।
સમસ્તનતમણ્ડલીસ્ફુરદભીષ્ટકલ્પદ્રુમઃ
 શચીસુત મયિ પ્રભો કુરુ મુકુન્દ મન્દે કૃપામ્ ॥ ૧॥

ન વર્ણયિતુમીશતે ગુરુતરાવતારાયિતા
 ભવન્તમુરુબુદ્ધયો ન ખલુ સાર્વભૌમાદયઃ ।
પરો ભવતુ તત્ર કઃ પટુરતો નમસ્તે પરં
 શચીસુત મયિ પ્રભો કુરુ મુકુન્દ મન્દે કૃપામ્ ॥ ૨॥

ન યત્ કથમપિ શ્રુતાવુપનિષદ્ભિરપ્યાહિતં
 સ્વયં ચ વિવૃતં ન યદ્ ગુરુતરાવતારાન્તરે ।
ક્ષિપન્નસિ રસામ્બુધે તદિહ ભાક્તરત્નં ક્ષિતૌ
 શચીસુત મયિ પ્રભો કુરુ મુકુન્દ મન્દે કૃપામ્ ॥ ૩॥

નિજપ્રણયવિસ્ફુરન્નટનરઙ્ગવિસ્માપિત
 ત્રિનેત્રનતમણ્ડલપ્રકટિતાનુરાગામૃત ।
અહઙ્કૃતિકલઙ્કિતોદ્ધતજનાદિદુર્બોધ હે
 શચીસુત મયિ પ્રભો કુરુ મુકુન્દ મન્દે કૃપામ્ ॥ ૪॥

ભવન્તિ ભુવિ યે નરાઃ કલિતદુષ્કુલોત્પત્તય-
 સ્ત્વમુદ્ધરસિ તાન્ અપિ પ્રચુરચારુકારુણ્યતઃ ।
ઇતિ પ્રમુદિતાન્તરઃ શરણમાશ્રિતસ્ત્વામહં
 શચીસુત મયિ પ્રભો કુરુ મુકુન્દ મન્દે કૃપામ્ ॥ ૫॥

મુખામ્બુજપરિસ્ખલન્મૃદુલવાઙ્મધૂલીરસ
 પ્રસઙ્ગજનિતાખિલપ્રણતભૃઙ્ગરઙ્ગોત્કર ।
સમસ્તજનમઙ્ગલપ્રભવનામરત્નામ્બુધે

શચીસુત મયિ પ્રભો કુરુ મુકુન્દ મન્દે કૃપામ્ ॥ ૬॥

મૃગાઙ્કમધુરાનન સ્ફુરદનિદ્રપદ્મેક્ષણ
 સ્મિતસ્તવકસુન્દરાધર વિશઙ્કટોરસ્તટે ।
ભુજોદ્ધતભુજઙ્ગમપ્રભ મનોજકોટિદ્યુતે
 શચીસુત મયિ પ્રભો કુરુ મુકુન્દ મન્દે કૃપામ્ ॥ ૭॥

અહં કનકકેતકીકુસુમગૌર દુષ્ટઃ ક્ષિતૌ
 ન દોષલવદર્શિતા વિવિધદોષપૂર્ણેઽપિ તે ।
અતઃ પ્રવણયા ધિયા કૃપણવત્સલ ત્વાં ભજે
 શચીસુત મયિ પ્રભો કુરુ મુકુન્દ મન્દે કૃપામ્ ॥ ૮॥

ઇદં ધરણિમણ્ડલોત્સવ ભવત્પદાઙ્કેષુ યે
 નિવિષ્ટમનસો નરાઃ પરિપઠન્તિ પદ્યાષ્ટકમ્ ।
શચીહૃદયનન્દન પ્રકટકીર્તિચન્દ્ર પ્રભો
 નિજપ્રણયનિર્ભરં વિતર દેવ તેભ્યઃ શુભમ્ ॥ ૯॥

ઇતિ શ્રીરૂપગોસ્વામિવિરચિતસ્તવમાલાયાં ચૈતન્યાષ્ટકં તૃતીયં સમ્પૂર્ણમ્ ।

*Chaitanyashtakam 3*

pdf was typeset on November 25, 2021

Please send corrections to *sanskrit@cheerful.com*